सामाजिक-विज्ञानम्

# सामाजिक-राजनैतिक-जीवनम् – 2

सप्तमकक्ष्यायै पाठ्यपुस्तकम्

## सामाजिक-विज्ञानम्

# सामाजिक-राजनैतिक-जीवनम् – 2

### सप्तमकक्ष्यायै पाठ्यपुस्तकम्




## राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

**NATIONAL COUNCIL OF EDUCATION RESEARCH AND TRAINING**

अनुवादकः – रूपलालशर्मा

*जनवरीमासः 2016 इत्यस्मात् संस्करणात्*
*अस्माभिः संस्कृतानुवादः कृतः ।*

# आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः  रूपरेखा (2005) ज्ञापयति यत् बालकानां विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती । नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च  अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयं  एकया दृढया भित्त्या आवरणस्य अथ च सूचनायाः  संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति । आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले स्वस्य अनुभवैः चिन्तनस्य च अवसरान् कल्पयन्ति । अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः  तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभिः सह युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां  सहभागिनः  सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति मतं त्यजन्तु ।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां  कुर्वन्ति । दैनन्दिन्यां समय-सारण्यां स्थिति-स्थापकत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारयिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने, हर्षस्य वातावरणस्य निर्माणे  कियता प्रभाविरूपेण चरितार्थं भविष्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः । एषः प्रयासः इतोऽपि गभीरतया स्यात् एतदर्थम् इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते, आश्चर्यस्य कृते, लघुषु समूहेषु वार्तालापस्य चर्चायाः च कृते, हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति ।  एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्,  एतद् योगदानं  सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञाः स्मः । वयं तानि सर्वाणि सङ्घटनानि  संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः ।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायाः निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः । व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नावीन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति, यतः भाविसंशोधनेषु सहायता लभ्येत ।

**नवदेहली** **निदेशकः**

**20 नवम्बरः 2005** **राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद् च**

**पाठ्यपुस्तक-विकास-समितिः**

**अध्यक्षः, सामाजिक-विज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः**

हरिवासुदेवनः, प्रोफेसरः, इतिहास-विभागः, कलकत्ता-विश्वविद्यालयः, कोलकाता (अध्यायः -2)।

**मुख्य-परामर्शदाता**

शारदा-बालगोपालनः, विकासशील-समाज-अध्ययन-पीठम्, दिल्ली।

**परामर्शदाता**

अरविन्दसरदाना, एकलव्य-शैक्षिकशोध-नवाचार-संस्थानम्, मध्यप्रदेशः।

**सदस्याः**

अञ्जलिनरोना, एकलव्य-शैक्षिकशोध-नवाचार-संस्थानम्, मध्यप्रदेशः।

दिप्ताभोगः, निरन्तर-जेंडर-शिक्षा-सन्दर्भ-समूहः,सर्वोदय-इन्क्लेव इति, नवदेहली।

कृष्णामेननः, रीडर, लेडी-श्रीराम-कालेज इति, दिल्लीविश्वविद्यालयः, दिल्ली।

लतिकागुप्ता, परामर्शदात्री, प्रा.शि.वि., राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद्, नवदेहली।

एम.वी.श्रीनिवासनः, प्रवक्ता, सा.वि.मा..शि.वि., राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद्, नवदेहली।

मालिनीघोषः, निरन्तर-जेंडर-शिक्षा-सन्दर्भ-समूहः, सर्वोदय-इन्क्लेव, नवदेहली।

मेरी ई.जॉन, निदेशकः, सेंटर फॉर वीमेन्स डेवलेपमेंट स्टडीज, नवदेहली।

एन.बी.सरोजनी, सामा-रिसर्च-ग्रुप फॉर वीमेन एंड हेल्थ इति, नवदेहली।

रंगन-चक्रवर्ती, ए 4/7, गोल्फ ग्रीन अर्बन कॉम्प्लेक्स इति, फेस I, कोलकाता।

सुकन्याबोसः, एकलव्य रिसर्च फेलो, 66 एफ, सेक्टर 8, जसोला विहार, नवदेहली

**हिन्दी-अनुवादः**

उषा चौधरी, प्रवक्ता, शिक्षा विभागः, डी.ए.वी.महाविद्यालयः, भोपालम्।

विवेकश्रीवास्तवः, हिन्दीप्रवक्ता, (तदर्थ इति), क्षेत्रीय-शिक्षा-संस्थानम्, (रा.शै.अ.प्र.प.), श्यामलाहिल्स, भोपालम्।

**सदस्यसमन्वयकः**

मल्ला वी.एस.वी.प्रसादः, प्रवक्ता, सा.वि.मा.शि.वि., राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद् , नवदेहली।

## कृतज्ञता-ज्ञापनम्

एतत् पुस्तकम् अनेकाभिः संस्थाभिः व्यक्तिभिः च लाभान्वितम् अस्ति । एतस्य पुस्तकस्य कार्ये पूनमबत्रा पियूदत्तः एस.मोहिन्दरः आदित्यनिगमः च सम्मिलिताः सन्ति । यैः अनेके पाठाः पठिताः तथा च स्वपरामर्शाः अपि दत्ताः । एतद् अतिरिच्य राजीवभार्गवः कौशिकघोषः अनुगुप्ता सुनीलः ए.वी.रमानी च तथ्यानां विषये चर्चां कृतवन्तः तथा च विशिष्टेषु पाठेषु परामर्शान् दत्तवन्तः । वी.गीता अतीव सहृदयतया सम्पूर्णान् पाठान् पठितवती तथा च तस्याः विस्तृतपरामर्शैः पुस्तकम् एतत् अतीव उपयोगि जातम् । अंजलिमांटीइरो एस.शङ्करः च विभिन्नेषु चरणेषु सञ्चार-माध्यमस्य (मीडियाः) विषये स्वविचारान् उपस्थापितवन्तौ यैः विचारैः तेषां पाठानां सार्थकतायाः वर्धने साहाय्यं कृतम् । टुलटुलविश्वासः अन्तिमपाठाय उपयुक्तकविताम् अन्वेष्टुं साहाय्यं कृतवती अपि च विनयमहाजनः तां कवितां पाठे सम्मेलितुम् आज्ञां दत्तवान् । संचिराविश्वासः दिप्ताभोगः इत्येते च कविताम् आङ्ग्लभाषया अनूदितवत्यौ अपि च रविकान्तः अनुवादाय अन्तिमरूपं दत्तवान् । स्मृतिवोहरा अपि सर्वथा अन्तिमेषु क्षणेषु सम्पादनं कृतवती । तस्याः पार्श्वे अत्यधिकं कार्यम् आसीत् तथापि सा सावधानतया सम्पादनं कृतवती । एलेक्सजार्जः अपि षष्ठकक्ष्यायाः पुस्तकस्य इव स्वविचारान् दृष्टिकोणं च अस्माभिः सह वण्टयित्वा महत्त्वपूर्णसाहाय्यं कृतवान् । उर्वशीबुटालिया अधुना अपि अस्माभिः सह अस्ति अपि च महता उत्साहेन सा समयं नियोज्य सम्पादनं कृतवती अपि च सुनिश्चितं कृतवती यत् तस्याः ध्यानपूर्वकपठनेन पुस्तकस्य लाभः स्यात् । वयं जुबानवर्यस्य आभारिणः स्मः यतो हि सः स्वपुस्तकस्य 'वीमेन – अ विज्युअल-हिस्ट्री-आफ-द-वीमेन्स-मूवमेंट-इन-इण्डिया' इत्यस्य चित्राणि प्रयोक्तुम् आज्ञां दत्तवान् । वयं दीवार-चलचित्रस्य चित्राणि प्रयोक्तुं त्रिमूर्ति-फिल्म्स–प्राइवेट-लिमिटेड् इत्यस्य अपि कृतज्ञाः स्मः । त्रिषष्टितमे पृष्ठे प्रदत्तचित्रं पार्टनर्स-फार-ला-एंड-डेवलपमेंट् इति दत्तवान् । गाजियाबादस्य केन्द्रीय-विद्यालयः -२, हिन्डनस्य कक्ष्या vi बी इत्यस्य विद्यार्थिनां अध्यापिकानां प्रधानाचार्यस्य च कृते धन्यवादं ज्ञापयामः ये भित्तिपत्रे स्फोरकपत्रे च कार्यं कर्तुं स्वीकृतवन्तः अपि च ते चित्रैः सह पुस्तके प्रयोक्तुम् आज्ञापितवन्तः । उत्तरीरलवे इत्यस्य योगेन्द्र–एस.राजपूतस्य नेशनलसेंटर-फार-प्रमोशन-आफ-इंप्लायमेंट-फार-डिसेबल्ड-पीपल इत्यस्य अपि कृतज्ञाः स्मः ये स्वसार्वजनिकविज्ञापनानां प्रयोगाय अनुमतिं दत्तवन्तः। सरायस्य एम.कुरैशी अपि आवश्यकतायां सत्यां सर्वदा साहाय्यं कृतवान् अतः वयं तस्य कृतज्ञाः स्मः।

एतस्मिन् पुस्तके यानि चित्राणि प्रयुक्तानि सन्ति तानि विभिन्नस्रोतोभ्यः सङ्कलितानि सन्ति अतः वयं तेषां सर्वेषां जनानां संस्थानां च सहृदयं धन्यवादं कुर्मः । सेंटर-फार-साइंस-एंड-इन्वायरनमेंट इत्यनेन अनेकानि चित्राणि दत्तानि अपि च अमितशङ्करः अनिलः च महान्तं कालं दत्तवन्तौ । अल्पे काले एव आउटलुक इति पत्रिकया अपि बहूनि चित्राणि दत्तानि । शीबा पितृव्या अपि महिलान्दोलन-सम्बद्ध-लेखाय स्वचित्राणि दत्तवती । सलिलचतुर्वेदी शाहिद-दातावाला च स्वसङ्ग्रहात् उपयुक्तानि चित्राणि दत्तवन्तौ । महेशबसादिया तवा-मत्स्य-सङ्घस्य चित्राणि दत्तवान् अपि च महिला-बालविकास-विभागस्य देवासः आङ्गन-वाटिकायाः चित्राणि दत्तवान् । हर्षमनराय बाजीरावपवारः च अपि चित्राणि दत्तवन्तः नूतनानि चित्रयितुं साहाय्यं च कृतवन्तौ । एम.वी.श्रीनिवासनः ईरोडतः चित्राणि आनयितुं साहाय्यं कृतवान् । देवज्योतिदत्तः विज्ञापनानां पाठेषु दत्तविज्ञापनानि निर्मातुं साहाय्यं कृतवान् । वयं नवदान्यायाः कृते धन्यवादं विज्ञापयामः यत् सा स्वास्थ्यस्य चित्रमालायाः कृते कानिचन चित्राणि दत्तवती । शारदाबालगोपालनद्वारा चित्राङ्कितानि कानिचन चित्राणि अपि अस्मिन् पुस्तके प्रयुक्तानि सन्ति।

यया रुच्या धीरजः ओरिजीतसेनः सलिलचतुर्वेदी च येन प्रकारेण एतस्य पुस्तकस्य चित्रकाररूपेण कार्यं कृतवन्तः तस्य गुणवत्ता प्रत्येकस्मिन् पृष्ठे परिलक्ष्यते। वयं तेषां कृतज्ञाः स्म।

हिन्द्यनुवादे एकलव्यः अतिमहत्त्वपूर्णां भूमिकाम् ऊढवान् । उषाचौधरी विवेकश्रीवास्तवः च अत्यन्तं धैर्यपूर्वकं पाठानाम् अनुवादं कृतवन्तौ । वयं तयोः कृतज्ञाः स्मः । वयं रश्मिपालीवालस्य टुलटुलविश्वासस्य च अपि कृतज्ञाः स्मः, ययोः साहाय्येन अनुवादकार्यं सम्पन्नतां गतम्।

वयं भोपालस्य क्षेत्रीय-शिक्षा-संस्थानस्य प्राचार्यस्य प्रोफेसर-ए.बी.सक्सेना इत्यस्य - सहयोगाय तस्य धन्यवादं कुर्मः।

अनेकाभिः संस्थाभिः अपि महत्त्वपूर्णाः भूमिकाः निरूढाः। ते अस्माकम् एतस्य पुस्तकस्य कृते व्यस्तताम् अवगतवन्तः अपि च पुस्तकसम्बद्धकार्ये अपि ते पर्याप्तं सहयोगं कृतवन्तः। विकासशीलसमाजाध्ययनपीठेन एकलव्येन, निरन्तरेण, सेंटर-फार-वीमेन्स-डवलेपमेंटस्टडीज, सामा इत्येताभिः संस्थाभिः चापि सहयोगः कृतः।

एतस्य पुस्तकस्य निर्माणस्य विभिन्नचरणेषु सहयोगाय वयम् डी.टी.पी.आपरेटर-उत्तमकुमारस्य अंजनाबख्शीवर्यायाः या कॉपी-एडिटर इति अस्ति तस्याः अपि च शशिदेव्याः या प्रूफ्रीडर् इति अस्ति तस्याः च विशेषत्वेन कृतज्ञाः स्मः। प्रकाशनविभागद्वारा वयं सम्पूर्णं सहयोगं सौविध्यानि च प्राप्तवन्तः एतदर्थं वयं तस्य कृतज्ञाः स्मः।

## शिक्षकाणां कृते भूमिका

'नागरिकशास्त्रं' 'सामाजिक-राजनैतिक-जीवनं' च परस्परं भिन्नतां भजतः। तत्र वर्णितविषयेषु पार्थक्यम् अस्ति अपि च तयोः कृते आवश्यक-शिक्षणोपायेषु अपि भिन्नता भवति। एतं विषयम् अधिकृत्य इयं भूमिका "सामाजिक-राजनैतिक-जीवनस्य काञ्चन् विषयान् स्पष्टीकर्तुं प्रयासं करिष्यति।

### सामाजिकं राजनैतिकं च जीवनं किम् अस्ति ?

सामाजिकं राजनैतिकं च जीवनं माध्यमिक-शालास्तरे समाजविज्ञानस्य पाठ्यक्रमे परम्परया जायमानस्य नागरिक-शास्त्रस्य स्थाने नूतनः विषयः अस्ति। राष्ट्रियपाठ्य-चर्यायाः रूपरेखायां २००५ तमे वर्षे बलाघात-पुरस्सरम् उक्तम् अस्ति यत् नागरिक-शास्त्रस्य परित्यागः आवश्यकः अस्ति तस्य स्थाने यः नूतनः विषयः स्वीक्रियते तस्मिन् विषये सर्वकारीय-संस्थाभ्यः तासां कार्याणां कृते दीयमानस्य महत्त्वस्य सन्तोलनं भवेत्। यथा 'सामाजिकं राजनैतिकं च जीवनम्' इति एतस्य पुस्तकस्य नाम्ना एव स्पष्टीभवति यद् एतस्मिन् विषये अद्यतनभारतस्य सामाजिक-राजनैतिकार्थिक-जीवन-विषयाः केन्द्रे स्थापयिष्यन्ते।

### सामाजिकस्य राजनैतिकस्य च जीवनस्य शिक्षणपद्धतिः का अस्ति ?

पूर्वं यत् नागरिकशास्त्रम् आसीत् तस्य अपेक्षया सामाजिकं राजनैतिकं च जीवनम् इत्यस्मिन् विषये सौकर्येण जीवनस्य वास्तविकस्थितीनाम् उपयोगः अवगमनं वा अत्र जायते। उच्यते यत् बालाः दृढानुभवानाम् आधारेण समीचीनतया विषयम् अवगच्छन्ति। माध्यमिक-शालायाः बालाः यान् कुटुम्बीय-सामाजिकान् अनुभवान् कक्ष्यां प्रति आनयन्ति तेभ्यः निर्मिताः सामग्र्यः अस्य विषयस्य शिक्षणे उपयुक्ताः। अतः तादृश्याः सामग्र्याः एव प्रयोगः अत्र कृतः अस्ति। भारतस्य संविधानस्य मूल्यानाम् अनुरूपम् एतेषु विषयेषु तार्किक-अवगमनाय तथा च एतेषां विश्लेषणाय छात्रेषु क्षमतायाः विकासकरणम् अपि 'सामाजिक-राजनैतिक-जीवनस्य' लक्ष्यम् अस्ति।



***एतस्मिन् पुस्तके प्रयुक्तकथानकेषु ग्राम्योदाहरणानि नागरोदाहरणानि च सन्ति।***

शिक्षणस्य अस्यां पद्धतौ परिभाषाणां यः उपयोगः विभिन्नावधारणाः अवगन्तुं भवति तादृशीनां परिभाषाणाम् उपयोगः अत्र नैव कृतः अस्ति। परिभाषाणां स्थाने वृत्तान्तानां समस्याध्यायानां च प्रयोगः कृतः अस्ति। वृत्तान्तेषु अन्तर्निहितानाम् अवधारणानां स्पष्टीकरणाय पाठमध्ये पाठान्ते च प्रदत्ताः प्रश्नाः सहायकाः भवन्ति। लक्ष्यम् एतदेव अस्ति यत् अध्येतारः स्वस्य अनुभवाधारेण अवधारणाः अवगच्छेयुः अपि च अवधारणानां विषये स्वस्य शब्दैः लिखेयुः इति।

बहुधा एतस्य अर्थः समागच्छति यत् पृष्टानां प्रश्नानां किमपि एकमेव समाचीनम् उत्तरं भवितुं न शक्नुयात् इति। किमपि उत्तरम् निश्चयेन असमीचीनं भवितुं शक्नोति। शिक्षकेण एतस्य मूल्याङ्कनं करणीयं यत् छात्रेण यत् उत्तरं प्रदत्तं तत् कियत् प्रतिशतं पाठस्य अवधारणायाः विषये बालानाम् अवबोधनं प्रदर्शयति।

**वयं जानीमः यत् बालाः स्वस्य अवगमनस्य तथा च स्वमनसि समागतानाम् अवधारणानां स्वपरिवेशस्य वास्तविकतया सह सामञ्जस्यं कृत्वा समीचीनतया अवगच्छन्ति। तदा किं एतत् सम्भविष्यति यत् राष्ट्रियस्तरस्य अस्माकम् एतत् पाठ्यपुस्तकं भिन्न-भिन्न-स्थानीयस्थितीनां कृते, यन्मिलित्वा अस्माकं राष्ट्रं निर्मितं, समीचीनतया स्थानं प्रदातुं शक्येत ?**



**राजनैतिक-सामाजिक-जीवनस्य च विषयवस्तूनि अनेकेषां समुदायानां विशेषरूपेण नाम गृहीतम् अस्ति। यथा दलित-यवन-निर्धनादीनाम्। अध्यापकाः पाठनकाले विद्यार्थिनां गरिम्णः स्वाभिमानस्य च क्षतिः न स्यात् इति विषये सावधानाः स्युः, यतो हि अत्र विविधसमुदायान् अधिकृत्य चर्चा कृता अस्ति। अतः एतस्मिन् विषये शिक्षकाः वचनबद्धाः भवन्तु यत् ते सर्वेषां सम्माननस्य विषये अवधानं यच्छन्ति।**

इदं पुस्तकं शिक्षणस्य अस्मिन् सिद्धान्ते सज्जीकृतम् अस्ति यत् बालाः स्वपरिवेशीयानुभवैः स्वचिन्तनेन च अवधारणाः अर्थात् विषयान् समीचीनतया अवगच्छन्ति । अस्मात् काचित् विसङ्गतिः समुद्भवति यत् राष्ट्रियस्तरे रचिताः पाठाः न तु विभिन्नस्थानीयस्थितीनां विषयाणां प्रतिनिधित्वं कर्तुं शक्नुवन्ति न च एतत् मत्वा लेखितुं शक्यन्ते यत् एते पाठाः कस्याश्चित् विशिष्ट-सामाजिक-सांस्कृतिक-पृष्ठभूमेः बालान् सम्बोधयन्ति इति। अतः सामाजिकराजनैतिकजीवने प्रस्तुत-उदाहरणानि वृत्तान्ताः च ग्रामीणनागरपरिवेशानां मिश्रितरूपेण सन्ति। अतः अध्येतुः कापि स्पष्टा छविः निर्मिता न भवति।

**कक्षायाम् अध्यापकाः अध्यायानां पाठनक्रियां समुचितरूपेण कुर्युः इति तु तेभ्यः अपेक्षा अस्त्येव इतोऽपि का अपेक्षा अध्यापकेभ्यः अस्ति ?**

अस्मिन् पुस्तके वर्णिताः ये अध्यायाः तत्रापि ये विषयाः वर्णिताः चर्चिताः च सन्ति ते दलितानां निर्धनानां यवनानां च विषये चर्चां कुर्वन्ति एते समुदायाः तत्र विषयरूपेण वर्णिताः सन्ति अतः अध्यापनकाले वातावरणम् असहजं न स्यात् इति शिक्षकेण तत्र चिन्तनीयम् अस्ति अतः पूर्णप्रतिबद्धतया एतादृश्याः सामग्र्याः कक्ष्यायां चर्चा भवेत्। अपरञ्च इयम् अपेक्षा अपि अस्ति यत् इदं पुस्तकं राष्ट्रियस्तरस्य अस्ति अतः अत्र स्थानीयसन्दर्भैः सह सम्बद्धता न्यूना एव स्यात् अतः पुस्तकलेखकानां यत् उद्देश्यम् अस्ति तत् अभिलक्ष्य शिक्षकः प्रयासं कुर्यात् यत् स्थानीयोदाहरणानि तेन विधिना प्रस्तुतं कुर्यात् येन तर्काणाम् अवगमनं भवेत्।

**अयं विषयः संविधाने प्रदत्तानि मान्यमूल्यानि आत्मसात्कर्तुं कथं साहाय्यं करोति ?**

प्रथमदृष्ट्या कश्चित् ऊहितुं शक्नोति यत् वास्तविकस्थितीनाम् उल्लेखेन संविधानशिक्षणस्य यत् उद्देश्यम् अस्ति तेन सह एतासां स्थितीनां विरोधाभासः जायते । अद्यावधि नागरिकशास्त्रस्य यानि पुस्तकानि सन्ति तेषां समीक्षणेन अस्माभिः एतत् अभिज्ञातं यत् तानि सर्वाणि संविधानं शिक्षयितुम् एव रचितानि सन्ति अपि च तानि वास्तविकतथ्यानां कृते अल्पं स्थानं यच्छन्ति स्म । अतः अस्माभिः अत्र पृथक्प्रयासः कृतः, बालकाः वास्तविक-जीवनाधारित-तथ्यानि आधिक्येन जानन्ति अतः ते सामाजिकराजनैतिकजीवनस्य विषये विशेषतया अवगच्छेयुः, अतः एतादृशः प्रयासः क्रियते । बालाः जनानां सङ्घर्षम् अपि जानीयुः यत् कुप्रथाः दूरीकर्तुं कथं ते संघर्षं कृतवन्तः तेषां समाजपरिष्कारक-समाजसेवि-जनानां च भूमिकायाः विषये अपि बालाः अवगच्छेयुः इति।

**सप्तमकक्ष्यायाः पुस्तके के के विषयाः वर्णिताः सन्ति ?**

भारतीयलोकतन्त्रे समानता इति विषयं छात्राः जानन्तु इति एव पुस्तकस्य मूलसूत्रम् अस्ति । इदं सूत्रं पुस्तकस्य कस्यचित् घट्टस्य विषयवस्तु अपि अस्ति । एतद् अतिरिच्य पुस्तके चत्वारः घट्टाः सन्ति राज्यशासनम्, लिङ्गम्, संचारमाध्यमानि, विज्ञापनानि विपणिः च । प्रत्येकं घट्टे



पाठक्रमद्वयम् अस्ति। परन्तु प्रथमे घट्टे एकः पाठः आदौ अपि च एकः पाठः पुस्तकस्य अन्तिमपाठरूपेण स्थापितः अस्ति।

**सप्तमकक्षायाः पुस्तकं चितविषयान् प्रस्तौतुं कान् उपायान् स्वीकरोति ?**

**चित्रकथापट्टम्** - गतवर्षे पुस्तकानाम् उपरि परामर्शः आगतः आसीत् यत् शिक्षकाः अध्यायस्य कथायुक्तांशान् पृथक् कर्तुम् काठिन्यस्य अनुभवं कुर्वन्ति अतः तत्र साहाय्यस्य आवश्यकता अस्ति । अतः अधुना कथायुक्तस्थलानि स्पष्टीकर्तुं चित्रकथायाः प्रयोगः कृतः अस्ति। छात्राः चित्राणां सजीवप्रस्तुतीकरणेन विषयान् गभीरतया ज्ञातुं समर्थाः भविष्यन्ति । चित्रकथापट्टे चर्चितविषयाणां विश्लेषणेन सह एव पाठ्यांशेषु अवधानं कृतम् अस्ति।

**शिक्षकाणां कृते पृष्ठम्** – प्रत्येकं घट्टः शिक्षकाणां कृते लिखितपृष्ठतः आरभते । अत्र द्वयोः अध्याययोः चर्चिताः मुख्यविषयाः वर्णिताः सन्ति।

**मूल्यांकने कश्चित् आलेखः** – षष्ठकक्ष्यायां परिभाषाः अथवा अवधारणानां सङ्क्षेपः प्रदत्तः आसीत्। अस्य वर्षस्य पुस्तके तत् न दीयते । अस्मात् छात्राः अध्यापकाः च काठिन्यम् अनुभवितुं शक्नुवन्ति बालाः किं जानीयुः का च अपेक्षा तेभ्यः स्यात् तैः किं शिक्षितम् इति विषयस्य मूल्याङ्कनं कथं स्यात् एतेषु सर्वेषु विषयेषु शिक्षकाः गभीरतया चिन्तयेयुः। अस्य भूमिकायाः अन्ते मूल्याङ्कनस्य पद्धतीनाम् उपरि कश्चित् सङ्क्षिप्तः आलेखः अस्ति । वयम् आशां कुर्मः यत् अनेन साहाय्येन छात्राः रटनाभ्यासतः मुक्तिं प्राप्स्यन्ति।

**शब्दसङ्कलनम्** – प्रत्येकस्मिन् अध्याये कस्यचित् लघुशब्दसङ्कलनम् अस्ति यस्मात् पाठे उपयुक्तभाषायां स्पष्टता भवेत् । एतस्मिन् सङ्कलने केवलम् अवधारणाः सम्मिलिताः न सन्ति परन्तु शब्दानाम् अर्थाः अपि सन्ति एतेषां कण्ठस्थीकरणं न स्यात् तेषाम् अवगमनं स्यात्।

**मध्यस्थाः अन्तस्थाः च प्रश्नाः** – षष्ठकक्ष्यायाः पुस्तकस्य इव सप्तमकक्ष्यायाः पुस्तके अपि अध्यायानाम् अन्ते प्रश्नाः







प्रदत्ताः सन्ति यत्र च चित्र-कथानुभवानां च विषयवस्तु आधारभूतम् अस्ति। अध्यायस्य मध्ये ये प्रश्नाः प्रदत्ताः सन्ति तेषां माध्यमेन शिक्षकाः एतत् अपि ज्ञातुं शक्नुवन्ति यत् विद्यार्थिनः विषयवस्तु केन रूपेण गृहीतवन्तः।

अध्यायस्य अन्ते ये प्रश्नाः सन्ति ते तु अध्यायस्य मुख्यविषयम् आधृत्य सन्ति छात्राः अध्यापकेन स्वशब्दैः तत्र बोधनीयाः इति अपेक्षा अस्ति।

# मूल्याङ्कन-प्रक्रियायां शिक्षकाणां साहाय्यार्थं केचन विचाराः

छात्रैः यद् अवगतम् अस्ति तस्य मूल्याङ्कनस्य उपायानां विषये आदितः चिन्तनं किञ्चित् कठिनं कार्यं भवति, परन्तु एतस्य नूतनविषयस्य कृते एतस्य आवश्यकता अस्ति। कालक्रमेण एषा परम्परा जाता अस्ति यत् सुप्रकारेण ये छात्राः रटितुं पारयन्ति ते आधिक्येन सफलीकरणीयाः । परिणामतः स्वतः एव शिक्षकाः पाठे प्रदत्तप्रश्नानाम् उत्तराणि रेखाङ्कितानि कृत्वा चिह्नीकरणे संलग्नाः सन्ति अपि च किमपि दुश्चक्रं चलति यत् आद्यवधि प्रवर्तते। अद्य एतस्य विषयस्य आवश्यकता अस्ति यत् शिक्षकाः प्रशिक्षणार्थिनः च रटनात् मुक्ताः भवेयुः अपि च रटनरूपिणः एतस्य दुश्चक्रस्य समाप्तिः स्यात्। आशासे एतस्मिन् परिवर्तनक्रमे शिक्षकाः स्वकीयां महत्त्वपूर्णां भूमिकां निर्वक्ष्यन्ति अपि च अनेन आलेखेन ते साहाय्यं प्राप्स्यन्ति।

## प्रश्नेषु

शिक्षकैः अनेन विषयेण आरम्भः करणीयः स्यात् यत् मूल्याङ्कनाय नूतनप्रश्नानाम् उपयोगः भवेत्। एते नूतनाः प्रश्नाः अध्याये प्रदत्तप्रश्नैः सह साम्यं भजेयुः। परन्तु छात्रेभ्यः इयम् अपेक्षा भविष्यति यत् ते प्रश्नानाम् उत्तराणि स्वशब्दैः लिखन्तु। एतत्कृते छात्राणाम् आत्मविश्वासस्य वर्धनं स्यात् अतः भाषागतशुद्धतादीनां कृते टीकाः टिप्पण्यः च सन्तुलितरूपेण सकारात्मकरूपेण च करणीयाः भविष्यन्ति।

विविधयोग्यतानां संवर्धनाय आकलनाय च शिक्षकैः विविधानां प्रश्नानां विकासः करणीयः भविष्यति। स्मृत्याः आश्रयेण तथ्यानि आवर्तितुं ये प्रश्नाः भवन्ति ते न्यूनमात्रया तत्र स्थापनीयाः स्युः। अनेन आधारेण एतादृशाः प्रश्नाः आधिक्येन भवेयुः ये प्रत्येकम् अध्यायस्य मुख्य-अवधारणात्मकविचारैः सम्बद्धाः भवेयुः। केचन तादृशाः प्रश्नाः भवेयुः यैः तर्कक्षमतायाः वर्धनं स्यात् अपि च यैः अनुभवानां मध्ये समानतायाः अवगमने साहाय्यं स्यात् अपि च अन्तरस्य ज्ञानम् अपि भवेत् ऊहाक्षमतायाः अपि विकासः स्यात्। एतान् परामर्शान् स्पष्टीकर्तुम् अत्र कानिचन उदाहरणानि प्रस्तूयन्ते।

### तर्कस्य क्षमता

निम्नलिखित-प्रश्नाः एनं विषयम् आकलयितुं साहाय्यं कुर्वन्ति यत् प्रशिक्षार्थिनः अध्यायस्य अवधारणाः कियता परिमाणेन अवगतवन्तः। अपि च तेषु निहितविचारान् स्वशब्देषु अभिव्यक्तुम् अपि च नूतनसन्दर्भेषु क्रियान्वयितुं ते कथं सक्षमाः सन्ति यथा –

अधिनियमस्य दृष्ट्यां सर्वे जनाः समानाः सन्ति अनेन कथनेन भवन्तः किम् अवगच्छन्ति ? भवतां विचारेण इदं लोकतन्त्रे महत्त्वपूर्णं किमर्थम् अस्ति ?

मुख्यमन्त्रिणा अन्यैः मन्त्रिभिः च स्वीकृतनिर्णयेषु विधानसभायां विचारः चर्चा वा किमर्थं भवेत् ?

किं भवन्तः तादृशौ द्वौ उपायौ ज्ञापयितुं शक्नुवन्ति येषां माध्यमेन भवन्तः चिन्तयन्ति यत् विज्ञापनस्य प्रभावः लोकतन्त्रे समानतायाः विषये भवति ?

भवन्तः किम् अनुभवन्ति, भवतां ग्रामस्य आपणे वस्तूनि कथम् आयान्ति ? ज्ञापयन्तु अपि च कानिचन उदाहरणानि ज्ञापयन्तु।

## अनुभवानां मध्ये समानताः अन्तराणि च परिचिन्वन्तु

एतादृशाः प्रश्नाः बोधनीयाः येषां शिक्षकाः दृढस्थितीनाम् उदाहरणानां च तुलनां कुर्वन्तः अन्तरस्पष्टीकरणस्य समानतायाः स्पष्टीकरणस्य च अवसरान् यच्छेयुः। एतादृशाः प्रश्नाः प्रायः बालस्य निजानुभवान् तोलयितुम् अपेक्षन्ते। एतादृशानां प्रश्नानां कानिचन उदाहरणानि अनेन प्रकारेण सन्ति –

विधानसभा-सदस्यद्वारा विधायिकाद्वारा कृतकार्याणां शासकीयविभागैः च कृतानां कार्याणां मध्ये किम् अन्तरम् अस्ति ?

भवतां ज्येष्ठत्वस्य अनुभवाः समोआ इति देशस्य बालानां किशोराणां च अनुभवैः कथं भिन्नाः सन्ति? एतेषु अनुभवेषु वर्णितं किञ्चित् एतादृशं तथ्यम् अस्ति यत् भवन्तः स्वस्य ज्येष्ठत्वस्य अनुभवे सम्मेलयितुम् एषिष्यन्ति ?

वस्त्रोद्योगगृहस्य श्रमिकाः वस्त्रनिर्यातकाः वैदेशिकवणिजः च प्रत्येकं युतके कियत् धनम् अर्जितवन्तः अथवा लाभांशं प्राप्तवन्तः? तुलनां कृत्वा जानन्तु।

भवन्तः स्वक्षेत्रेषु उपलब्धासु सार्वजनिक-निजस्वास्थ्यसेवयोः मध्ये च कानि कानि अन्तराणि पश्यन्ति? अधोलिखितां तालिकां पूरयन् एतस्याः तुलनां कुर्वन्तु अपि च अन्तरं ज्ञापयन्तु।

| सौविध्यानि | सेवानां मूल्यम् | सेवानाम् उपलब्धता |
|---|---|---|
| निजी | | |
| सार्वजनिकी | | |

## कस्याश्चित् स्थितेः विवरणात् निष्कर्षस्य अवगमनम् अनुमानं च

एतादृशाः प्रश्नाः सामाजिकराजनैतिकजीवनाय विशिष्टं महत्त्वं दधति यतो हि एतस्मिन् विषये कथानकानां वृत्तान्तानां च महता स्तरेण उपयोगः अभवत् अपि च बालस्य दृढानुभवानाम् अपि कथनम् अत्र कृतम् अस्ति । एते एव प्रश्नाः सन्ति ये वृत्तान्तान् तेषु निहितैः अवधारणात्मकैः विचारैः बालान् योजयन्ति । प्रश्नानां साहाय्येन वयम् आकलयितुं शक्नुमः यत् प्रशिक्षणार्थिनः केन प्रकारेण वृत्तान्तान् अवगतवन्तः सन्ति अपि च ते सम्बन्धिताः अवधारणाः कथं स्पष्टीकर्तुं पारयामः।

भवतां विचारेण ओमप्रकाशवाल्मीकिना सह तस्य शिक्षकाः सहपाठिनः च असमानतायाः व्यवहारं किमर्थम् अकुर्वन्? आत्मानम् ओमप्रकाशवाल्मीकेः स्थाने स्थापयन्तः पङ्क्तिचतुष्टयं लिखन्तु यत् उक्तस्थितौ भवन्तः कथम् अनुभवेयुः?

किं हरमीतस्य सोनाल्याः च इदं कथनम् उचितम् आसीत् यत् हरमीतस्य अम्बा कार्यं न करोति?

भारते प्रायः इदम् उच्यते यत् वयं स्वास्थ्यसेवाः प्रदातुम् असमर्थाः स्मः, यतो हि सर्वकारस्य पार्श्वे एतदर्थं पर्याप्तं धनं सौविध्यानि च न सन्ति। उपरि वामतः प्रदत्तस्य स्तम्भस्य अध्ययनस्य पश्चात् किं भवन्तः एनं समीचीनं मन्यन्ते? चर्चयन्तु।

इदं विज्ञापनम् अस्मान् एतस्य समूहस्य वस्तूनां क्रयणे सति किम् अनुभावयति? इदं विज्ञापनं कीदृशैः जनैः सह संवादं कारयति अपि च कीदृशेषु जनेषु अवधानं न करोति?

## दृश्य-सामग्र्याः व्याख्यानम्

अनेन एव प्रकारेण छात्राणां पुरतः दृश्यसामग्र्याः अध्ययनस्य तस्याः व्याख्यानस्य च अपि अवसराः भवेयुः। चित्राधारिताः तालिकाधारिताः रेखाचित्राधारिताः च प्रश्नाः प्रष्टव्याः ।

१. चित्रं पश्यन्तु अपि च तस्य बालस्य विषये चिन्तयन्तु, यः सोपानैः अधः आनीयते । किं भवन्तः अनुभवन्ति यत् एतस्याम् अवस्थायां विकलाङ्गतायाः अधिनियमस्य क्रियान्वयनं क्रियते ? सः भवनं सरलतया आगच्छेत्, तदर्थं किम् आवश्यकम् अस्ति? तम् उत्थाप्य सोपानैः अवतारणं किं तस्य सम्माननं सुरक्षां च प्रभावयति?



२. किं भवन्तः एतस्मै रेखाचित्राय शीर्षकं दातुं शक्नुवन्ति? अनेन रेखाचित्रेण भवन्तः सञ्चारमाध्यमस्य व्यापकवाणिज्यस्य च मध्ये परस्परं सम्बन्धम् अवगन्तुं समर्थाः प्रभवन्ति?




१. अधः प्रदत्ते युतकस्य चित्रे दर्शितम् अस्ति यत् व्यवसायी कियन्तं लाभांशं प्राप्नोत् अथ च सः कियन्तं व्ययम् अकरोत्। यदि युतकस्य युक्तराशिः ६००रुप्यकाणि सन्ति तर्हि एतेन चित्रेण जानन्तु यत् एतस्य युतकस्य मूल्ये किं किं सम्मिलितम् अस्ति?



## उत्तराणाम् अवगमनम्

अपरञ्च विद्यार्थिभ्यः इयम् अपेक्षा क्रियते यत् ते स्वशब्देषु उत्तराणि लेखिष्यन्ति, शिक्षकैः इयम् अपेक्षा न कर्तव्या यत् विद्यार्थिनः तैः अभीष्टानि मन्यमानानि उत्तराणि न यच्छेयुः। अस्माभिः इदं मूल्याङ्कनं करणीयं यत् प्रशिक्षार्थिनः काः अवधारणाः अवागच्छन्, तासाम् अवधारणानाम् आधारेण ते कीदृशान् तर्कान् कुर्वन्ति अथ च स्वमनसि जायमानान् विचारान् कथं ते अभिव्यञ्जन्ति। यदा शिक्षार्थिभ्यः इयम् अपेक्षा क्रियते यत् ते कस्मिंश्चित् वृत्तान्ते प्रस्तुतस्थितिम् अवगच्छेयुः अपि च तस्यां निहितावधारणायाः निजविश्लेषणे उपयोगं कुर्युः तर्हि स्वाभाविकरूपेण इयमेव अपेक्षा भविष्यति यत् तेषां पक्षतः आगम्यमानानां विभिन्नानाम् उत्तराणां काञ्चित् सीमां यावत् उत्तररूपेण स्वीकृतिः स्यात्।

अतः एतद् अत्यन्तम् आवश्यकं भवति यत् शिक्षकाः मिलित्वा सामूहिकरूपेण मूल्याङ्कनाय कांश्चन समाननिर्देशान् सज्जीकुर्युः यतः ते सर्वे शिक्षकाः समानाधारेषु निश्चिन्वन्तु यत् कीदृशानि उत्तराणि समीचीनोत्तराणां परिसीम्नि आयन्ति, कानि कानि च उत्तराणि असमीचीनानि मंस्यन्ते। वयम् अत्र कानिचन उदाहरणानि दत्त्वा स्पष्टीकुर्मः यत् कस्यचित् प्रश्नस्य उत्तरे समीचीनोत्तराणां परिसीम्नि कः आशयः अस्ति अथ च असमीचीनोत्तराणि कानि कथयितुं शक्ष्यन्ते।

***यदि भवान् अंसारीपरिवारस्य कश्चित् सदस्यः स्यात्,तर्हि सम्पत्तिविक्रेत्रा नामपरिवर्तनस्य यः परामर्शः दत्तः तस्य उत्तरं कथं दद्यात्?***

### समीचीन-उत्तराणां काचित् सीमा

| उत्तराणि | समीक्षा |
|---|---|
| “यदि अहम् अंसारीपरिवारस्य सदस्या अभविष्यं तर्हि निश्चितम् अकरिष्यं यत् स्वनाम न पर्यवर्तिष्यं यतो हि अनेन परिवर्तनेन मम गरिम्णः आत्मसम्मानस्य च हानिः अभविष्यत्।” | इदं सङ्क्षिप्तं स्पष्टं च उत्तरम् अस्ति अपि च इङ्गितं करोति यत् बालिका विषयम् अवगतवती अथ च स्वविचारान् अभिव्यङ्क्तुं शक्नोति। |
| “अहम् अन्सारी अभविष्यं तर्हि स्वनाम न पर्यवर्तिष्यं यतो हि अस्माकं परिवारस्य परम्पराभ्यः इदम् एव नाम अस्ति, अथ च यदि मया एतत् वक्तव्यम् अभविष्यत् यत् अहम् अन्यः अस्मि तर्हि अहम् असमीचीनम् अन्वभविष्यम्।” | अयं बालः अध्यायस्य शब्दानाम् उपयोगम् अवधारणाः अभिव्यङ्क्तुं न शक्नोति परन्तु तेन तेषाम् अर्थाः समीचीनतया गृहीताः अथ च सः विचारान् स्वशब्दैः निजानुभवैः अभ्यव्यक्तं कृतवान्। |
| “अहं सम्पत्तिविक्रेतुः वार्ताम् अमंस्यम् अपि च स्वनाम पर्यवर्तिष्यम्। अहम् एतत् कार्यम् एतदर्थम् अकरिष्यम् यतो हि गृहस्य अन्वेषणं कुर्वती अहं श्रान्ता जाता। अहम् अनेन कृत्येन सन्तुष्टा तु नास्मि परन्तु वासाय किञ्चित् स्थानं तु मे स्यात्”। | प्रथमदृष्ट्या वयम् अनुभविष्यामः यत् एतत् उत्तरं तु असाधु उत्तरम् अस्ति यतो हि बाला सम्पत्तिविक्रेतुः परामर्शेन सहमता जायते। किन्तु यदा प्रश्ने अस्माभिः बालस्य परामर्शः पृष्टः अस्ति तर्हि सः परामर्शः द्वौ पक्षौ प्रति गन्तुं शक्नोति, कामं सः तर्कसङ्गतः भवेत्। निश्चयेन अयं तर्कसङ्गतः भवेत्। कामम् अत्र बालायाः उत्तरं यत् सा बाध्यतावशात् न इच्छन्ती अपि नामपरिवर्तनं करिष्यति एषा घटना विषयः वा एतत् दर्शयति यत् सा एतत्तथ्यम् अवगतवती यत् अंसारीदम्पत्योः गरिम्णः नाशस्य कोऽर्थः अस्ति। |
| **असाधु उत्तरम्**<br>आम् अहं स्वनाम परिवर्तिष्ये। यतो हि तेन मम गरिमा वर्धिष्यते। | अयं प्रश्नः अध्यायस्य मानवीयगरिम्णः मूल्यम् इति भागात् पृष्टः अस्ति। छात्रः अंसारीवर्येण तस्य भार्यया च अनुभूतस्य भेदभावस्य गरिम्णः च धारणायाः च मध्ये समीचीनम् अन्तर्सम्बन्धं कल्पयितुं न शक्तवान्। |